तस्या व्याध्याद्यभिभवो न भवेत्। अतएव नारदः "व्याधिता सभ्रमा व्यग्रा राजकर्मपरायणा। आमन्त्रिता चेन्नागच्छेद्दण्ड्या बड़वा स्मृता" इति। पारदार्य्यप्रसङ्गात् कन्यायामपि दण्डमाह याज्ञवल्क्यः "अलङ्कृतां हरन् कन्यामुत्तमं त्वन्यथाऽधमम्। दण्डं दद्यात् सवर्णासु प्रतिलोम्ये वधः स्मृतः" इति। अलङ्कृतां विवाहाभिमुखीं तां सवर्णां कन्यामपहरन् उत्तमसाहसं दण्डनीयः। तदनभिमुखीं हरन् प्रथमसाहसम्। उत्कृष्टवर्णजातां हरतः क्षत्रियादेर्वध इत्यर्थः। आनुलोम्येन सकामाहरणे न दण्डस्तथा च स एव "सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः" इति। कन्यादूषणे दण्डमाह स एव "दूषणे तु करच्छेद उत्तमायां वधः स्मृतः। शतं स्त्रीदूषणे दद्यात् द्वे तु मिथ्याभिशंसने" इति। "पश्वून् गच्छन् शतं दाप्यो हीनां स्त्रीङ्गाञ्च मध्यमम्" इति। यदाकामां कन्यामस्वस्थतादिना प्रसह्य दूषयति तदा करच्छेदः। यदा तु अङ्गुलिप्रक्षेपेण तामेव योनिक्षतां कुर्वन् दूषयति तदा विशेषमाह मनुः "अभिषह्य तु यः कन्यां कुर्य्याद्दर्पेण मानवः। तस्याशु कर्त्ये अङ्गुल्यौ दण्डञ्चार्हति षट्शतम्" इति। सकामदूषणेऽप्याह स एव "सकामां दूषयन् कन्यां नाङ्गुलिच्छेदमर्हति। द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये" इति। यदा कन्या विदग्धा वा कन्यां दूषयति तदाप्याह स एव "कन्यैव कन्यां या कुर्य्यात्तस्यास्तु द्विशतो दमः। या तु कन्यां प्रकुर्य्यात् स्त्री सा सद्यो मौण्ड्यमर्हति। अङ्गुल्योरेव वा छेदः खरेणोद्वहनन्तथा" इति कुर्य्यात् योनिक्षतवतीमिति शेषः। यदा पुनरुत्कृष्टजातीयां कन्यां सकामामकामां वाभिगच्छति तदा हीनस्य क्षत्रियादेर्वधः। यदा सकामां सवर्णामभिगच्छति तदा शुल्कं गोमिथुनं तत्पित्रे दद्यात्। अनिच्छति तस्मिन् दण्डरूपेण राज्ञे दद्यात्। असवर्णामकामाङ्गच्छतो वध एव। तदाह मनुः "उत्तमां सेवमानस्तु जघन्योवधमर्हति। शुल्कं दद्यात् सेवमानः समामिच्छेत् पिता यदि। योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति। सकामां दूषयं स्तुल्यो न वधं प्राप्नुयान्नरः" इति। चाण्डाल्यादिगमने दण्डमाह याज्ञवल्क्यः "अन्त्याभिगमने त्वङ्क्य कुवर्णेन प्रवासयेत्। शूद्रस्तथान्त्य एव स्यादन्त्यस्यार्यागमे वधः" इति। अन्त्या चाण्डाली तद्गमने त्रैवर्णिकान् प्रायश्चित्तानभिमुखान् "सहस्रं त्वन्त्यजस्त्रियमिति" मनुवचनानुसारेण पणसहस्रं दण्डयित्वा कुत्सितवर्णेन भगाकारेणाङ्कयित्वा स्वराष्ट्रान्निर्वासयेत्। शूद्रः पुनश्चाण्डालीङ्गच्छंश्चण्डाल एव। अङ्क्य एवेति माधवीये पाठः। चाण्डालस्य तूत्कृष्टजातिस्त्र्यभिगमने वध एवेत्यर्थः। योनिव्यतिरिक्तस्थले गच्छतो दण्डमाह स एव "अयोनौ गच्छतो योषां पुरुषं वाऽभिमेहतः। चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे" इति। यस्तु योषां मुखादावभिगच्छति पुरुषं वाभिमुखं मेहति तथा प्रव्रजितां वा गच्छति असौ चतुर्विंशतिपणा दण्डनीय इत्यर्थः। स्त्रीकृते संग्रहणे दण्डमाह बृहस्पतिः "गृहमागत्य या नारी प्रलोभ्य स्पर्शनादिना। कामयेत् तत्र सा दण्ड्या नरस्याद्र्धदमः स्मृत" इति वचसा स्त्रियं प्रलोभ्य गच्छतः पुरुषस्य यो दण्डस्तदर्द्धं दण्ड्या"।

**स्त्रीसभ** न० स्त्रीणां सभा क्लीवत्वम्। स्त्रीसमाजे।

**स्त्रीसेवा** स्त्री ६त०। स्त्रीसम्भोगे व्यवायमधर्मेण नारीसेवने

**स्त्रीस्वभाव** पु० स्त्रिया इव स्वभावो यस्य। १अन्तःपुररक्षके मह्लके शब्दमा० ६त०। २स्त्रीणां शीले च। स्त्रीपुंधर्मशब्दे दृश्यम्।

**स्त्रैण** न० स्त्रिया इदम् अण् नञ्। १स्त्रीस्वभावे "स्त्रैणेन नीता विकृतिं लघिम्ना" भट्टिः। २स्त्रीविधेये स्त्रिया अपत्यं स्त्रीणां समूहो वा अण्। ३स्त्र्यपत्ये स्त्रीसमूहे न०।

**स्थ** त्रि० स्था—क। १स्थितिशीले प्रायेण उत्तरपदस्थित एवार्थं प्रयुज्यते यथा पदस्थः मार्गस्थः। २स्थले पु० शब्दर०।

**स्थग** संवरणे भ्वा० पर० सक० सेट् घटा० मिचि न वृद्धिः। स्थगति अस्थगीत्। अघोपदेशत्वमस्य चिन्त्यमूलम्।

**स्थग** त्रि० स्थग-अच्। धूर्त्ते शब्दर०।

**स्थगन** न० स्थग-ल्युट्। आच्छादने हेमच०।

**स्थगित** त्रि० स्थग-क्त। १आवृते २तिरोहिते हेमच०।

**स्थगी** स्त्री स्थग्यतेऽनया घञर्थे क गौरा० ङीष्। ताम्बूलपात्रे करङ्के हेमच०।

**स्थगु** न० स्थग-उन्। गड्डौ (कुज) "तदेव स्थगु यद्दीर्घं रथघोणमिवायतम्। लब्धार्था च प्रतीता च लेपयिष्यामि ते स्थगु" रामा० बा० ९अ०।

**स्थण्डिल** न० स्थल-इलच् नुक् लस्य डः। १चत्वरे उन्नत्यवनतिशून्ये समीकृते प्रदेशे अमरः। "निषेदुषी स्थण्डिल एव केवले" कुमारः। २यज्ञार्थं परिष्कृतस्थाने शब्दर०